नामांक Roll No.

Sl.No. :

No. of Questions – 30

No. of Printed Pages – 07

VU-94-Sans. Vangmay

# वरिष्ठ उपाध्याय परीक्षा, 2018

## संस्कृत वाङ्मय (अनिवार्यः)

समय : 3¼ घण्टे

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः।

2) सर्वे प्रश्नाः अनिवार्याः।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

1) ''शैवः'' इत्यत्र कः प्रत्ययः? [1]

2) 'तस्य समूहः' इति सूत्रस्य उदाहरणं लिखत। [1]

3) 'मनुष्यः' इत्यस्य चत्वारि नामानि लेख्यानि। [1]

4) कन्यायाः नामद्वयं लिखत। [1]

5) मातुः भ्राता कः? लिखत। [1]

6) नेत्रस्य चत्वारि नामानि लेख्यानि। [1]

7) वारनामानि लेख्यानि। [1]

8) पञ्चाङ्गस्य पञ्च-अङ्गानि लेख्यानि। [1]

9) कति नक्षत्राणि? [1]

10) ज्योतिष शास्त्रानुसारं सम्पूर्ण ब्रह्माण्डे कति ग्रहाः सन्ति? [1]

11) श्रीमदम्बिकादत्तव्यासस्य संक्षिप्तपरिचयः लेख्यः। [2]

12) निम्नलिखितस्य भावार्थो लेख्य :- [2]

ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मान-मन्धतमसं पातयन्ति न वयं शिवगणास्तादृशाः।

13) भर्तृहरेः शतकत्रयम्। नामानि लेख्यानि। [2]

14) अधोलिखित पद्यांशस्य भावार्थो लेख्य :- [2]

दुर्जनः परिहर्तव्यो विद्ययाऽलङ् कृतोऽपि सन्।

मणिना भूषितः सर्पः किमसौ न भयङ्करः।।

15) पुत्रस्य चत्वारि नामानि लेखनीयानि। [2]

16) कति राशयः भवन्ति? नामानि लेखनीयानि। [2]

17) अशुद्धिसंशोधनं कुरूत - (रेखाङ्कित पदयोः) [2]

i) बालकः मोदकं रोचते।

ii) विद्यालयस्य परितः वनमस्ति।

18) कस्यचिदेकस्य गद्यांशस्य सप्रसङ्ग – व्याख्या विधेया – [1 + 2 = 3]

i) अथ यावद् द्वारस्थ–स्तम्भोपरि संस्थापितायां काच–मञ्जुषायां जाज्वल्यमानस्य प्रबलप्रकाशस्य दीपस्य समीपे समायातः, तावत्संन्यासिनोक्तम् – दौवारिक! अपि मां पूर्वमपि कदाप्यद्राक्षीः ? ततो दौवारिकः पुनस्तं निपुणं निरीक्षमाणो मन्द्रेण स्वरेण, अरूणा–पाङ्गाभ्यां लोचनाभ्यां, गौरतरेण वर्णेन, चुम्बितयौवनेन वयसा, निर्भीकेण हारिणा च मुखमण्डलेन पर्यचिनोत्।

ii) यावद् गौर सिंहः किमपि विवक्षित तावत्प्रतीहारः प्रविश्य 'विजयतां महाराजः' इति त्रिर्व्याह्वत्य, करौ संपुटीकृत्य, शिरो नमयित्वा कथितवान् ''भगवन्! दुर्ग द्वारि कश्चन गोपीनाथनामा पण्डितः श्रीमन्तं दिदृक्षुरूपतिष्ठते। नायं समयः प्रभूणां दर्शनस्य, पुनरागम्यताम्'' इति बहुशः कथ्यमानोऽपि किञ्चन्नत्या वश्यककार्यम्'' इति प्रतिजानाति।

19) शिवराज विजयस्य काव्यगतवैशिष्ट्यं संक्षेपेण लिखत। [3]

20) कस्यचिदेकस्य पद्यांशस्य सप्रसङ्ग व्याख्या विधेया – [1 + 2 = 3]

i) श्रोत्रं श्रुतेनैव न कुण्डलेन,

दानेन पाणिर्न तु कङ्कणेन।

विभाति कायः करूणापराणां,

परोपकारैर्न तु चन्दनेन।।

ii) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

नास्त्युद्यमसमो बन्धुर्यं कृत्वा नावसीदति।।

21) खलसज्जनानां मैत्री कीदृशी भवति? [3]

22) केषांचित् त्रयाणां वाक्यानां संस्कृतभाषायाम् अनुवादो विधेयः [3 × 1 = 3]

i) गुरू शिष्य को वेद पढ़ाता है।

ii) पेड़ से फल गिरा।

iii) रूचि विद्यालय की ओर जाती है।

iv) राम और मोहन घर जाऐंगे।

v) स्वच्छता में श्री निवास करती है।

23) कयोश्चित् द्वयोः सूत्रयोः व्याख्या कार्या - [2 × 2 = 4]

i) क्रमादिभ्यो वुन्

ii) राष्ट्राऽवार पाराद्घखौ

iii) अश्वपत्यादिभ्यश्च

24) कयोश्चित् द्वयोः सूत्रयोः व्याख्या कार्या - [2 × 2 = 4]

i) झोऽन्तः

ii) लुटः प्रथमस्य डारौरसः

iii) अनद्यतने लङ्

25) कयोश्चिद् द्वयोः चत्वारः – चत्वारः पर्यायाः लेखनीयाः – [2 × 2 = 4]

i) स्त्री

ii) मस्तकः

iii) पुत्री

26) कयोश्चिद् द्वयोः नामानि लेखनीयानिः – [2 × 2 = 4]

i) मासाः

ii) ऋतवः

iii) पक्षः

27) कंचन–एकं विषयमवलम्ब्य निबंध (150 शब्दैः) लिखत – [5]

i) स्त्री शिक्षा

ii) स्वच्छताऽभियानम्

iii) संस्कृत भाषाया महत्त्वम्

iv) परोपकारः

28) अधोलिखितेषु केऽपि त्रयः प्रयोगाः साधनीया : - [3 × 2 = 6]

दाक्षिः, कानीनः, जनता, शिखावलः, मध्यमः

29) अधोलिखितेषु केऽपि त्रयः प्रयोगाः साधनीया : - [3 × 2 = 6]

भवन्ति, भविष्यामि, अभवत् भवितारौ, अभविष्यत्

30) निम्नांकितेषु केऽपि चत्वारः प्रयोगाः साधनीया :- [4 × 2 = 8]

ग्राम्यः, नित्यः, कवर्गीयम्, परितः, लघुत्तमः, दन्तुरः

✈ ✈ ✈

DO NOT WRITE ANYTHING HERE